**PAPER - 3**

# MT

**2017 .... .... 1200** **Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II PAPER - III**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

ऑटोरॉथफिल्डमहोदयः प्रहृष्टः यतः .......... (सः अलिबागस्य मण्डलाधिकारी । / विनायकेन आरेखितं छत्रपतिशिवरायस्य चित्रं तेन दृष्टम् ।)

II) पूर्णवाक्येन उत्तरत । १

विनायकेन बेल्लूरमठस्य कृते किं कृतम् ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

ऑटोरॉथफिल्डमहोदयः कोलकत्तानगरस्य मण्डलाधिकारी अस्ति ।

ग्रामेऽस्मिन् पाण्डुरङ्गकरमरकरनाम्नः कृषीवलस्य सङ्गीत-चित्र-कलादिभिः परिपूर्णं, शान्तिसुखयोः निधानमिव गृहमासीत् । तत्र एकनवाष्टैकतमे ख्रिस्ताब्दे (१८९१) ऑक्टोबरमासस्य द्वितीये दिने पुत्रजन्मोत्सवः संपन्नः जातः । एष विनायकः नाम बालः बाल्य एव पित्रा सह मृत्प्रतिमाः निर्मातुं प्रारभत । विविधप्राणिनां देवतानां च प्रतिमानिर्माणे तस्यासीद् रुचिः। पुस्तकस्थानां विविधचित्राणां पुनर्विलेखनेऽपि स मग्न आसीत् । सततं निरीक्षमाणेन तस्य पित्राऽपि तस्मिन् समुचितसंस्काराः समारोपिताः । एकदा ग्रामस्थराममन्दिरेऽनेन छत्रपतिशिवरायस्य चित्रं विलेखितम् । तस्मिन् समये अलिबागमण्डलाधिकारी ऑटोरॉथफिल्डमहोदयः ग्रामस्य व्यवस्थापननिरीक्षणार्थ-मागतः । दृष्टमात्रे तस्मिन् चित्रे तन्मनः प्रहृष्टम् । अतस्तेन विनायकः मुम्बईस्थिते जे. जे. महाविद्यालयं प्रवेशितः । तत्रापि स्वप्रतिभया कौशल्येन च विनायकेन प्रथमः क्रमाङ्कः प्राप्तः । समाप्तेऽध्ययने रॉथफिल्डमहोदयेन गुरुवर्य-रवीन्द्रनाथटागोरमहोदयेन सार्धमस्य परिचयः कारितः। गुणी गुणिनं वेत्तीति सूक्त्यनुसारं रवीन्द्रनाथेन कोलकत्तानगरं स निमन्त्रितः । तत्र विनायकेन बेल्लूरमठस्य कृते श्रीरामकृष्णपरमहंसमहोदयस्य पूर्णाकृतिः प्रतिमा निर्मिता ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) योग्यं पर्यायं चिनुत । १

१) तस्यासीत् - ......... + आसीत् । (तस्य / तस्यः)

२) मन्दिरेऽनेन - ......... + अनेन । (मन्दिरः / मन्दिरे)

II) समूहेतरपदं लिखत । १
१) लीनः, कुशलः, रतः, मग्नः ।
२) सम्प्राप्य, प्राप्य, दृष्ट्वा, लब्ध्वा ।

III) विशेषण-विशेष्य-अन्वितिः । १
१) प्रतिमा : पूर्णाकृतिः :: क्रमाङ्कः : ............ ।
२) संस्काराः : समुचिताः :: मनः : ............ ।

IV) 'तृतीया एकवचनम्' इति विभक्तिवचनप्रत्ययान्ते द्वे नामनी लिखत । १

**३. स्वमतप्रकटनम् ।** २
जीवने मार्गदर्शकस्य महत्त्वं किम् इति माध्यमभाषया लिखत ।

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १
१) सोमशर्मा सानन्दं स्वगृहं न्यवर्तत यतः सः ....... (अनन्तभट्टस्य उपचारान् नैच्छत् । / अनन्तभट्टात् स्वास्थ्यसूत्रम् अलभत ।)

२) जनाः अस्वास्थ्यम् अनुभवन्ति यतः ते ........ (स्वकार्येषु अतिव्यग्राः । / उपचारान् प्रति अवधानं न ददति ।)

II) कः कं वदति । १
''भवान् प्रभाते पद्भ्यामागच्छतु ।''

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १
षड्वैद्याः उपचारार्थं धनम् अपेक्षन्ते ।

सुहास्यवदनः अनन्तभट्टोऽवदत्, ''भवत उपचाराः प्रारब्धा एव । मम षड्भिः सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम् ।'' एतन्निशम्य चकितचकितः सोमशर्मा अपृच्छत्,''षड् वैद्याः?'' अनन्तभट्टः प्रत्युवाच - ''सूर्यप्रकाशः, सुखदवायुः, शीतलजलं, व्यायामः, सात्त्विकभोजनं, विश्रामश्चेति। एतेभ्यो महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते । भवत्सदृशा विविधकार्यव्यग्रा जना एतेषु षट्सु वैद्येषु नावधानं ददतीति जानाम्यहम् । अत एव भवान् प्रभाते पद्भ्यामागच्छतु इति मया कथितम् । भवन्तमहं शीतलजले स्नातुं सात्त्विकभोजनं भोक्तुं च प्रेरितवान् । एते सर्वेऽनुभवाः आनन्ददायका इति भवता सूचितमेव । भवानेतान् षड्वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु । एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति किम्? इतोऽपि यदि भवानधिकं साहाय्यमपेक्षते तर्हि सप्तमो वैद्योऽहं सहकार्यार्थं सदैव सिद्धोऽस्मीति''। बद्धाञ्जलिः सोमशर्मा सादरमनन्तभट्टाय अकथयत्,''सप्तमस्य वैद्यस्य आवश्यकता न स्यात् एतदर्थेऽहं सदैव यथाशक्ति प्रयतिष्ये ।'' ततो वैद्यराजाय धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

१) एतन्निशम्य = ....... + निशम्य । २) अस्मीति = अस्मि + ....... ।

II) चतुर्थपदं लिखत । १

१) वैद्यः : भिषक् :: अनायासः : ..........

२) विस्मितः : चकितः :: सानन्दम् : ..........

III) विशेषण-विशेष्य-अन्वितिः । १

| विशेषणम् | विशेष्यम् |
|---|---|
| ......... | अनुभवाः |
| ........ | अनन्तभट्टः |

(आनन्ददायकाः, सिद्धः, सुहास्यवदनः, बद्धाञ्जलिः)

IV) गद्यांशात् चित्वा द्वे धातुसाधित-ल्यबन्त-अव्यये लिखत । १

३. **जालचित्रं पूरयत ।** २




**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

लेरसियादर्शमनम् अतीव ........... यतः सः केनापि ........ ।

(शोभनं / कुरूपं) (निमन्त्रितः / न आमन्त्रितः)

II) पूर्णवाक्येन उत्तरं लिखत । १

ग्रामवासिभिः अतिथयः कथं सत्कृताः ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत ।

द्वाभ्यां भ्रातृभ्यां लेरसिया सादरं गृहं नीतः ।

लेरसियासहिता येऽन्ये जना आसन् ते ग्रामवासिभिर्जनैः स्वगृहं भोजनार्थमाहूताः । बहुना आतिथ्येन नृत्यगीतवादनैश्च सत्कृताः । परं लेरसिया न केनापि समाहूतः यतोऽतीव जुगुप्साकरमभद्रं च तस्य दर्शनम् । तेन न कोऽपि तं स्वगृहं नेतुं मनस्यकरोत् । तस्मिन् जनस्थाने द्वौ भ्रातरौ न्यवसताम् यावतीव अधनौ परं मनसोदारौ करुणापरौ च । ताभ्यां ज्ञातं यद् ग्रामे एकोऽभद्ररूपः कश्चिज्जनो जीर्णवस्त्राधानः क्षुत्पीडितः स्थितः । न कश्चन तेन सह वार्तामपि करोतीति । तयोरेकस्तस्य समीपं गत्वाऽवदत्, भद्र, वयं तु अधनाः । अस्माकमेतावदपि धनं नास्ति यद् वयं भोजनार्थं किमपि भवते समर्पयामः । तथापि वयमिच्छामो यद् भवानस्माकं जीर्णकुटीमागच्छतु प्रज्ज्वलिताग्नेरुष्णतां चानुभवतु । यत् किमप्यस्मत्सविधे विद्यते तदास्वादयतु ।''

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

१) यावतीव - यौ + .......... ।

२) तदास्वादयत - ....... + आस्वादयतु ।

II) विलोमशब्दौ मेलयत । १

| अ | ब |
|---|---|
| उदारः | निकटे |
| दूरे | कृपणः |
| | सधनः |

III) चतुर्थपदं लिखत । १

१) दर्शनम् : जुगुप्साकरम् :: आतिथ्येन : ........ ।

२) नरः : क्षुत्पीडितः :: कुटी : ........ ।

IV) गद्यांशात् चित्वा के अपि द्वे धातुसाधित-अव्यये लिखत । १

**३. पृथक्करणम् ।** २

**यथाक्रमं घटनां लिखत ।**

i) लेरसिया न केनापि समाहूतः ।

ii) भ्रातृभ्यां लेरसिया आमन्त्रितः ।

iii) ग्रामवासिभिः सहकारिणः सत्कृताः ।

iv) द्वाभ्यां भ्रातृभ्यां लेरसियाविषये सर्वं ज्ञातम् ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

आसीत् कोऽपि प्रतिष्ठाने तपोदत्त इति द्विजः ।
स पित्रा क्लेश्यमानोऽपि विद्यां नाध्यैत शैशवे ॥१॥
अनन्तरं गर्ह्यमाणः सर्वैरनुशयान्वितः ।
स विद्यासिद्धये तप्तुं तपो गङ्गातटं ययौ ॥२॥
तत्राश्रितोग्रतपसस्तस्य तं वीक्ष्य विस्मितः ।
वारयिष्यन् द्विजच्छद्मा शक्रो निकटमाययौ ॥३॥
आगत्य च स गङ्गायास्तटाच्चिक्षेप वारिणि ।
उद्धृत्योद्धृत्य सिकताः पश्यतस्तस्य सोर्मिणि ॥४॥
तद् दृष्ट्वा मुक्तमौनस्तं तपोदत्तः स पृष्टवान् ।
अश्रान्तः किमिदं ब्रह्मन्करोषीति सकौतुकम् ॥५॥

**१. पृथक्करणम् । उचितानि विशेषणानि चित्वा जालरेखाचित्रं पूरयत ।** २




२. विद्यासिद्धये तपोदत्तेन यः उपायः योजितः सः योग्यः अस्ति वा अयोग्यः इति माध्यमभाषया स्पष्टीकुरुत । २

**प्र.२. ब) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) समूहेतरपदं लिखत । १

१) ध्वजः, केतनः, मेदिनी । २) कृषकः, बलीवर्दः, कृषीवलः ।

II) 'धरणी' इत्यस्य कृते के अपि द्वे विशेषणे पद्यांशात् चित्वा लिखत । १

सस्यगर्भिणी धरणी हरिता
स्वेदबिन्दुभिर्यैरभिषिक्ता
तेषामेव श्रमेण फलिता हसति मेदिनीयम्
हरितक्रान्त्यास्तद् हरितत्वं ध्वजेऽपि पल्लवितम् ।
ध्वजे स्थितेयं हरिताभा मां प्रेरयते सततम्
'जयतु किसानो' वदन्ती ह्यहं नमामि तं कृषकम् ॥१॥
नृपाणां च नराणां च केवलं तुल्यमूर्तिता ।
आधिक्यं तु क्षमा धैर्यमाज्ञादानं पराक्रमः ॥२॥

२. **अन्वयपूर्तिः ।** २

....... च नृपाणां च केवलं ....... । ......., धैर्यम्, आज्ञादानम्, ....... (एतेषां गुणानां नृपेषु) आधिक्यम्।

क) **द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) ज्ञानेन ............. महानुभावाः ॥

ii) गजाननं ............. पादपङ्कजम् ॥

iii) कदर्थितस्यापि ............. कदाचिदेव ॥

ड) **वृत्तनाम चिनुत ।** १

वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥ (उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

**तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

परिमाणेन विना चित्रम् आकर्षकं भवति ।

II) एकपदेन उत्तरं लिखत । १

हृदयस्य भावाः कैः प्रकटिताः भवन्ति ?

चित्रसूत्रविवरणसमये मार्कण्डेयमुनिना आयामोच्छ्रायमानवर्णनं कृतम् । चित्रे स्त्रीपुरुषयोः दैर्घ्यम्, उद्गतता तथा च शरीरस्य अङ्गप्रत्यङ्गम् इत्येतेषां चित्रसूत्रम् इति संज्ञा । इदं सर्वं प्रमाणितं भवेत् । यतो हि परिमाणेन विना चित्रमाकर्षकं न भवति । अपि च काव्यशास्त्रे ये शृङ्गारवीर-करुणादयः नवरसाः वर्णिताः ते एव चित्रे प्रकटिताः भवेयुः । रसानां चित्रणं चित्रे चैतन्यं निर्माति । अङ्गविभङ्गैः हृदयस्य भावाः प्रकटिताः भवन्ति । भावानां चित्रणं नवरसानुकूलं कर्तव्यम् । भावयुक्तं चित्रं प्रभावकारि भवति । चित्रे भावानां रसानां च चित्रणं कथं विधेयमिति ज्ञापयितुं चित्रलक्षणानि कथितानि । व्यक्तिप्रकृतिमनुसृत्यापि चित्रं कथमारेखनीयमिति सङ्केताः वर्णिताः विद्यन्ते । यथा शान्तप्रकृतिमनुजस्य चित्रणसमये भ्रूः अर्धचन्द्राकारा भवेत्। नर्तकस्य भ्रूः धनुराकारा भवेत् । देवतानां चित्रं भूषणैरलङ्कृतं प्रसन्नमुखं धृतक्षौमं चालिखेत् । ऋषिचित्रणं जटाजूटयुक्तं कृष्णाजिनधारि दुर्बलं तेजोयुक्तं चावश्यकम्। चित्रस्य महत्त्वपूर्णमङ्गं लावण्यम् । चित्रकारेण अङ्गप्रत्यङ्गस्य प्रमाणं ज्ञात्वा कस्मिन् अङ्गे क्षयः आवश्यकः कस्मिन् अङ्गे वृद्धिरनिवार्या इति चिन्तनीयम् । इत्थं चित्रकारनैपुण्यार्थं यद् यदावश्यकं तत्सर्वमार्गदर्शनं श्रीविष्णुधर्मोत्तरपुराणे कृतं विद्यते ।

२. **पृथक्करणम् ।** २




**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

अ) **कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

अस्ति हेमाङ्गदे देशे राजपुरं नाम नगरम् । तत्र जीवंधरो नाम कोऽपि दयाशीलो राजपुत्रोऽभवत्। एकदा प्रवृत्ते मधुमासे जीवंधरकुमारः ....... सह जलक्रीडां कर्तुं नदीं गतः । तत्र आसन्नमरणः कोऽपि कुक्कुरः तस्य दृष्टिमागतः । केनापि निर्दयेन भृशं ताडितः सः रुधिरप्लावितः तत्र पतितः करुणं आक्रोशति स्म । भूतानुकम्पी राजकुमारः बहु दुःखितः। तत्समीपम् ....... करतलेन परामृशन् करुणस्वरेण कुमारः अभाषत, 'भद्र केन ....... नराधमेन मारितोऽसि । भवतु यथाशक्ति लघूकरोमि ते दुःखम् । इत्युक्त्वा कुक्कुरं समाश्वासयितुं भृशं ....... । हस्तेन जलमानीय तमपाययत् । तथा च सानुक्रोशं भगवन्तं प्रार्थ्य तत्कर्णे मूलमन्त्रमुपदिष्टवान् । तस्य मन्त्रसामर्थ्येन स सारमेयः शान्तः सद्गतिं च गतः। अहो ....... महानुभावस्य ।

(आगत्य, भूतदया, वयस्यैः, प्रायतत, निर्दयेन)

ब) **३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. संस्कृतभाषा । २. वृत्तपत्राणि । ३. दीपावलिः ।

क) **संस्कृतानुवादः । ८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) There are eight sections of Ayurveda.
ii) Tell your mobile number.
iii) I go to library.
iv) Let your fame ever increase.
v) That drama is too good.
vi) Laziness is the greatest enemy of a man.
vii) Delhi is the capital o f India.
viii) Army chief arranges the array.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) याच् १ आ.प. २) वि + रम् १ प.प.

३) सम् + ऋ १ प.प. ४) वि + तॄ १ प.प.

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) गृहेषु अभितः क्रीडाङ्गणं वर्तते । २) लक्ष्मीं नमः ।

३) हर्षदा नृत्यकलायाः निपुणा । ४) गृहं निकटम् उद्यानम् अस्ति ।

## पञ्चमः विभागः - व्याकरणम् ।

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| ज्ञा ९ आ.प. | .......... | .......... | .......... | अजानीत | ........ | जानीत |
| श्रु ५ प.प. | .......... | .......... | श्रृणोति | ........ | श्रृणोतु | ........ |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| सप्तमी | ...... | वाचोः | ...... |
| तृतीया | ...... | ...... | श्रीमद्भिः |
| पञ्चमी | सर्वस्मात् | ...... | ...... |
| प्रथमा | ...... | भवन्तौ | ...... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(प्राप्ता, आनीतवान्, गन्तव्यः, लिखन्ती, पीतवती, दत्तम्, स्मरणीयम्, विचरन्)

**ड) समासाः ।**

**कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | समस्तपदम् | समासविग्रहः | समासनामानि |
|---|---|---|---|
| i) | महाप्रयासः | .................... | कर्मधारय समास |
| ii) | ............ | दिने दिने । | अव्ययीभाव समास |
| iii) | शान्तिसुखयोः | शान्तिः च सुखं च, तयोः । | .................... |
| iv) | कशाघातैः | .................... | तृतीया तत्पुरुष समास |
| v) | अहितः | .................... | नञ् बहुव्रीहि समास |
| vi) | पक्षिप्रेम | पक्षिषु प्रेम । | .................... |
| vii) | नृपः | .................... | उपपद तत्पुरुष समास |
| viii) | विविधाः | विशिष्टाः विधाः येषां ते । | .................... |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) घण्टानादे जायमाने छात्राः वर्गकक्षां प्रविशन्ति । (सतिसप्तमीं निष्कासयत ।)

ii) भवान् सत्वरं उपचारं करोतु । ('भवान्' स्थाने 'त्वम्' उपयुज्य वाक्यं पुनर्लिखित ।)

iii) तैः ज्ञातम् आत्मिक्याः सम्पदः मूल्यम् । (प्रयोगं परिवर्तयत ।)

iv) भृत्यः भारं हरति । (स्वामी) (प्रयोजकरचनां कुरुत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) नवरात्रं नाम ............ रात्रीणां समाहारः । (9)

ii) पाण्डवेषु अर्जुनः ................. । (3rd)

iii) ............. पुराणानि प्रसिद्धानि । (18)

iv) पितामही दिनस्य ............... भोजनं करोति । (once)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

भारतीया संस्कृतिः संस्कृतभाषामाश्रित्य तिष्ठति । भारतस्यात्मा संस्कृत्या प्रकाशते । संस्कृतभाषायाः पुनरुज्जीवनं तदा भविष्यति यदा जनजीवनस्य प्रत्येकं क्षेत्रे संस्कृतस्य प्रयोगः भवेत् । संस्कृतभाषा यदा भारतस्य व्यवहारभाषा आसीत् तदा भारतं 'विश्वगुरुः' इति ख्यातिमलभत। विदेशेभ्यः छात्रा अत्र अध्ययनार्थमागच्छन्ति स्म । नालन्दा-आदि-विश्वविद्यालयेषु विविधानि शास्त्राणि तेभ्यः पाठयन्ते स्म । पुनः विश्वगुरुत्वं प्राप्तुं भारतेन संस्कृतस्य अवलम्बनं करणीयमेव।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

i) अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च सङ्गमार्थम् ।
आपत्प्रपन्नस्य मोक्षणार्थं यन्मन्त्र्यतेऽसौ परमो हि मन्त्रः ॥

ii) हीनसेवा न कर्तव्या कर्तव्यः महदाश्रयः ।
रामममासाद्य लङ्कायां लेभे राज्यं विभीषणः ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

दूतः – देव ! कश्चिद् दरिद्रः भवतो दर्शनप्रार्थी ।
राजा – त्वरितं सादरमानय तम् । (दरिद्रः प्रविशति राजा पृच्छति) कुतः आगच्छसि भोः?
दरिद्रः – कैलासाद् आगच्छामि देव ।
राजा – ब्रूहि अपि स भगवान् शिवः सकुशलः ।
दरिद्रः – तस्य कुशलतायाः प्रश्न एव न उदेति । स तु दिवंगतः ।
राजा – किं दिवंगतः ? कथम् । अस्माभिः नैव श्रुतम् ।